# ॥ सुब्रह्मण्यषोडशनामस्तोत्रम् ॥

सुब्रह्मण्यं प्रणाम्यहं सर्वज्ञं सर्वगं सदा।
अभीप्सितार्थ-सिद्ध्यर्थं प्रवक्ष्ये नामषोडशम्॥ १ ॥

प्रथमो ज्ञानशक्त्यात्मा द्वितीयो स्कन्द एव च।
अग्निभूश्च तृतीयः स्याद् बाहुलेयश्चतुर्थकः॥ २ ॥

गाङ्गेयः पञ्चमो विद्यात् षष्ठः शरवणोद्भवः।
सप्तमः कार्त्तिकेयः स्यात् कुमारः स्यादथाष्टकः॥ ३ ॥

नवमः षण्मुखश्चैव दशमः कुक्कुटध्वजः।
एकादशः शक्तिधरो गुहो द्वादश एव च॥ ४ ॥

त्रयोदशो ब्रह्मचारी षाण्मातुरश्चतुर्दशः।
क्रौञ्चभित् पञ्चदशकः षोडशः शिखिवाहनः॥ ५ ॥

एतद्षोडशनामानि जपेत् सम्यक् सदादरम्।
विवाहे दुर्गमे मार्गे दुर्जये च तथैव च॥ ६ ॥

कवित्वे च महाशास्त्रे विज्ञानार्थी फलं लभेत्।
कन्यार्थी लभते कन्यां जयार्थी लभते जयम्॥ ७ ॥

पुत्रार्थी पुत्रलाभं च धनार्थी लभते धनम्।
आयुरारोग्यवश्यश्च धनधान्य-सुखावहम्॥ ॥ ८ ॥

॥ इति श्री-शङ्करसंहितायां शिवरहस्यखण्डे
श्री-सुब्रह्मण्यषोडशनामस्तोत्रं सम्पूर्णम् ॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Subrahmanya_Shodasha_Nama_Stotram.

generated on **August 16, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits